# Class-12

# SANSKRIT

GENERAL EDUCATION DEPARTMENT
SAMAGRA SHIKSHA, KERALA

**STANDARD - XII**

**SANSKRIT**

**Second Language**
**Focus Area**

| Unit | Lesson |
|---|---|
| 1. आर्द्रता | 1. तव विरहे। |
| | 2. व्रज हरितम्। |
| | 3. भविष्ये तव। |
| 2. मानविकता | 4. चिन्तारतो बालकः। |
| | 5. को हेतुः? |

## WORK SHEET ON PART- II SANSKRIT
## अभ्यासपत्रिका द्वितीयभाषा संस्कृतम् ।

### एककम् – १ - आर्द्रता
### पाठः - १ - तव विरहे......

**I. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।**

1. गीतगोविन्दस्य कर्ता कः? ......................................।
   (जयदेवः, कालिदासः, व्यासः)

2. गीतगोविन्दे कति सर्गाः सन्ति ? ......................................।
   (द्वादश, त्रयोदश, अष्टादश)

3. सा भारं मनुते किम् ? ......................................।
   (हारं, मलयजपङ्कं, जालं )

4. मलयजपङ्कं विषमिव पश्यति - का ? ......................................।
   ( राधा, सखी, शारिका )

5. विरहविहितमरणा का ? ......................................।
   (राधा, प्रीयसखी, तापसी )

6. बालशशिनमिव सायमलोलम् का? ......................................।
   ( राधा, सखी, चन्द्रिका )

7. किसलयतल्पं हुताशनकल्पं मनुते । कस्मात् ? ......................................।
   ( विरहात्, क्रोधात्, भयात् )

8. राधा कथं हरिरिति हरिरिति जपति ? ......................................।
   ( सकामं, सदाहं, अलोलम् )

9. गीते चन्दनमित्यर्थे प्रयुक्तं पदं किम् ? ......................................।
   (मलयजं, नलिनं, किसलयम् )

10. श्रीजयदेवभणितं गीतम् - किम्? ......................................।
(गीतगोविन्दम् , भजगोविन्दम् , नारायणीयम् )

11. किं गणे नान्तर्भवति ? ......................................।
(कन्दर्पः, कामदेवः, शारिका )

12. गीतगोविन्दकाव्यस्य नायिका का ? ......................................।
(तापसी , शारिका, राधा )

13. शार्दूलविक्रीडितं विरचयन् यमायते। कः? ......................................।
(कृष्णः, व्याघ्रः, कामदेवः )

14. वपुः इति पदस्य अर्थः कः ? ......................................।
(वक्त्रं, मुखं, शरीरं )

15. राधा किम् विषमिव पश्यति ? ......................................।
(हारं, जालं, चन्दनं )

**II. उदाहरणानुसारं पदच्छेदं लिखत।**

**क). उदा-**

| | | |
|---|---|---|
| **सापि** | - | **सा +अपि।** |
| कापि | - | |
| मालापि | - | |
| सीतापि | - | |
| राधापि | - | |
| रमापि | - | |

**ख). उदा-**

| | | |
|---|---|---|
| **रामोऽपि** | - | **रामः+ अपि।** |
| तापोऽपि | - | |
| कोऽपि | - | |
| कन्दर्पोऽपि | - | |
| कृष्णोऽपि | - | |

**ग).** **उदा-**

| | | |
|---|---|---|
| **विषमिव** | - | **विषम्+ इव ।** |
| दहनमिव | - | |
| शशिनमिव | - | |
| नलिनमिव | - | |
| चलनमिव | - | |

**घ).** **उदा-**

| | | |
|---|---|---|
| **रविरिति** | - | **रविः+ इति ।** |
| हरिरिति | - | |
| कविरिति | - | |
| पतिरिति | - | |

**III.** **प्रदत्तं श्लोकं पठित्वा प्रस्तुताऽप्रस्तुतानि येजयत ।**

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते ।
सापि त्वद्विरहेण हन्त ! हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयञ्छार्दूलविक्रीडितम् ।।

| **प्रस्तुतानि ।** | **अप्रस्तुतानि ।** |
|---|---|
| अवासः। | |
| प्रीयसखीमाला । | |
| तापः । | |
| राधा । | |
| कन्दर्पः। | |

**IV. प्रस्तुताप्रस्तुतानि यथोचितं योजयत।**

| | | |
|---|---|---|
| आवास: | - | हरिणी। |
| प्रियसखीमाला | - | हुताशनकल्पम्। |
| ताप: | - | मदनदहनम्। |
| राधा | - | विपिनम्। |
| मलयजपङ्कम् | - | जालम्। |
| श्वसितपवनम्- | - | दावदहनज्वाला। |
| किसलयतल्पम् | - | विषम्। |

| प्रस्तुतानि | अप्रस्तुतानि |
|---|---|
| आवासः | |
| प्रियसखीमाला | |
| तापः | |
| राधा | |
| मलयजपङ्कम् | |
| श्वसितपवनम् | |
| किसलयतल्पम् | |

**V. गीतं पठित्वा आशयं लिखत।**

**(क)** स्तनविनिहितमपि हारमुदारम्।
सा मनुते कृशतनुरिव भारम्।

......................................................................................................................
......................................................................................................................
......................................................................................................................
......................................................................................................................
......................................................................................................................
......................................................................................................................

(ख) सरसमसृणमपि मलयजपङ्कं
पश्यति विषमिव वपुषि सशङ्कम् ।

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

(ग) श्वसितपवनमनुपमपरिणाहं
मदनदहनमिव वहति सदाहम्।

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

(घ) दिशि दिशि किरति सजलकणजालं
नयननलिनमिव विगलितनालम्।

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

(ङ) नयनविषयमपि किसलयतल्पं
कलयति विहितहुताशनकल्पम्।

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

(च) त्वजति न पाणितलेन कपोलं
बालशशिनमिव सायमलोलम् ।

..........................................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

**(छ) हरिरिति हरिरिति जपति सकामं**
**विरहविहितमरणेव निकामम्।**

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

**(ज) श्रीजयदेवभणितमिति गीतं**
**सुखयतु केशवपदमुपनीतम्।**

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

**VI. "क"- विभागे प्रदत्तमाशययुक्तंश्लोकं "ख" विभागात् चित्वा लिखत।**

| क | ख |
|---|---|
| हारं भारं मनुते। | श्रीजयदेवभणितमिति गीतं<br>सुखयतु केशवपदमुपनीतम्। |
| राधा सकामं जपति। | त्वजति न पाणितलेन कपोलं<br>बालशशिनमिव सायमलोलम्। |
| चन्दनं विषमिव विशङ्क्य पश्यति। | हरिरिति हरिरिति जपति सकामं<br>विरहविहितमरणेव निकामम्। |
| इदं गीतं मोक्षदायकं भवति। | दिशि दिशि किरति सजलकणजालं<br>नयननलिनमिव विगलितनालम्। |
| तल्पम् अग्निना रचितम् इव गणयति। | सरसमसृणमपि मलयजपङ्कं<br>पश्यति विषमिव वपुषि सशङ्कम्। |

| | |
|---|---|
| कृष्णदर्शनाकांक्षया सर्वासु दिक्षु सा वीक्ष्यति। | स्तनविनिहितमपि हारमुदारम्।<br>सा मनुते कृशतनुरिव भारम्। |
| सायंकाले कपोलदेशे पाणिं धृत्वा चिन्तयति। | नयनविषयमपि किसलयतल्पं<br>कलयति विहितहुताशनकल्पम्। |
| विरहात् निश्वासः कामाग्निरिव प्रतीयते। | श्वसितपवनमनुपमपरिणाहं<br>मदनदहनमिव वहति सदाहम्। |

| क | ख |
|---|---|
| हारं भारं मनुते। | ..........<br>.......... |
| राधा सकामं जपति। | ..........<br>.......... |
| चन्दनं विषमिव विशङ्क्य पश्यति। | ..........<br>.......... |
| इदं गीतं मोक्षदायकं भवति। | ..........<br>.......... |
| तल्पम् अग्निना रचितम् इव गणयति। | ..........<br>.......... |
| कृष्णदर्शनाकांक्षया सर्वासु दिक्षु सा वीक्ष्यति। | ..........<br>.......... |
| सायंकाले कपोलदेशे पाणिं धृत्वा चिन्तयति। | ..........<br>.......... |
| विरहात् निश्वासः कामाग्निरिव प्रतीयते। | ..........<br>.......... |

**VII. इष्टतमपदं चित्वा सूचनानुसारम्  आस्वादनटीकां लिखत।**

त्यजति न पाणितलेन कपोलं
बालशशिनमिव सायमलोलम्॥

दिशि दिशि किरति सजलकणजालं
नयननलिनमिव विगलितनालम्॥

नयनविषयमपि किसलयतल्पं
कलयति विहितहुताशनकल्पम्॥

**सूचनाः -** आमुखम्, आशयम्, आस्वादनम्।

**(इष्टतमश्लोकलेखनम्)**

.............................................................................................................................

.............................................................................................................................

**(आमुखम्)**

.............................................................................................................................

.............................................................................................................................

.............................................................................................................................

**(आशयम्)**

.............................................................................................................................

.............................................................................................................................

.............................................................................................................................

**(आस्वादनम्)**

.............................................................................................................................

.............................................................................................................................

.............................................................................................................................

.............................................................................................................................

**VIII.** **"तव विरहे" इति अष्टपद्याः आस्वादनटीकां सूचिकानुसारं लिखत।**

**सूचिकाः -**

आवासो विपिनायते, ------ हारं भारं मनुते, ------ विषमिव पश्यति, ------ विगलितनालम् , ------ किसलयतल्पम्, ------ जपति सकामम् ।

..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................

**IX.** **अधः प्रदत्तानि सूचकानि स्वीकृत्य विरहिण्याः राधायाः अवस्थाम् अधिकृत्य एकम् उपन्यासं लिखत।**

**सूचकाः** -

आवासो विपिनायते, , ------ विषमिव पश्यति, , ------ किसलयतल्पम् , ------ जपति सकामम् ।

..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................
..........................................................................................................

## एककम् – १ - आर्द्रता
## पाठः – २ - व्रज हरितम्।

**I. कोष्ठकात् समुचितमुत्तरम् निर्धार्य लिखत।**

1. महाभारतस्य कर्ता कः? ...............................
 ( व्यासः, भासः, वाल्मीकिः )

2. पञ्चमवेदः कः ? ...............................
 (रामायणम् , महाभारतम् , आयुर्वेदम् )

3. एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् । एषः कः ? ...............................
 (सर्पः, व्याधः, वृक्षः )

4. हा हतोऽस्मि । कस्य रोदनमिदम् ? ...............................
 (पक्षिणः, लुब्धकस्य, वृक्षस्य )

5. पितरौ कृतज्ञतापूर्वकं कम् अनमताम् ? ...............................
 (वृक्षराजं , सर्पं, व्याधं )

6. "शारिके! जानामि सर्वं वृत्तान्तम्" ।कस्याः वचनमिदम् ? ...............................
 (तापस्याः, मातुः, शारिकायाः )

7. "एकस्यां शाखायां वृक्षः तां दोलायितुं प्रचक्रमे" काम् ? ...............................
 (तापसीं, शारिकां, मातरं )

8. शुककथा कस्मिन् ग्रन्थे उपलभ्यते ? ...............................
 (महाभारते, रामायणे, रघुवंशे )

9. 'भवन्तः गच्छन्तु नाहम् अधुना आगच्छामि' कस्याः वचनम् ? ...............................
 (तापस्याः, शारिकायाः, मातुः )

10. वृक्षस्य शुष्कशाखा कस्य शिरसि अपतत् ? ...............................
 (सर्पस्य, पक्षिणः, लुब्धकस्य )

11. वृक्षस्य आर्द्रता ........स्पर्शमिव आश्वासदायिन्यभवत् ? ...............................
 (मातुः, पितुः, भगिन्याः)

**II. उदाहरणानुसारं पदच्छेदं लिखत।**

| | | | | | |
|---|---|---|---|---|---|
| 1. **उदा -** | तत्रैव | = | तत्र | + | एव |
| | अत्रैव | = | ............ | + | ............ |
| 2. **उदा -** | कुत्रापि | = | कुत्र | + | अपि |
| | तत्रापि | = | ............ | + | ............ |
| 3. **उदा -** | कोऽपि | = | क: | + | अपि |
| | सोऽपि | = | ............ | + | ............ |
| 4. **उदा -** | स्पर्शमिव | = | स्पर्शम् | + | इव |
| | पोतकानिव | = | ............ | + | ............ |
| 5. **उदा -** | भोजनमन्विष्य | = | भोजनम् | + | अन्विष्य |
| | रुदितमश्रौषम् | = | ............ | + | ............ |

**III. पेटिकातः पदानि चित्वा वाक्यं क्रमीकृत्य लिखत।**

| | | |
|---|---|---|
| भवन्त: गच्छन्तु | भोजनमन्विष्य | आगच्छामि |
| शारिका | नाहमधुना | तत्रैव उपाविशत् |
| पितरौ | तूष्णीं भूत्वा | गतौ |

..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

**IV. गद्यभागं पठित्वा क्त्वान्त- ल्यबन्त- तुमुन्नन्तपदानि चित्वा लिखत।**

1. भवन्तः गच्छन्तु नाहमधुना आगच्छामि। अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुम् शक्नुमः।

| **क्त्वान्तम्** | **ल्यबन्तम्** | **तुमुन्नन्तम्** |
|---|---|---|
| | | |
| | | |

2. वृक्षः सर्वदा अस्मान् परित्रातुं व्यग्रः आसित्। तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था। गच्छन्तु, सर्वे गच्छन्तु।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| | | |
| | | |

**V. रेखाङ्कितपदानां स्थाने कोष्ठकात् समानार्थकपदान्युपयुज्य वाक्यं पुनर्लिखत।**

1. प्रातः निर्झर्याः कलरवं श्रुत्वा शाखामृगाणां लाङ्गूलान्दोलनं च दृष्ट्वा शाखायां मन्दं मन्दम् आन्दोलयन्ती अहं व्याधस्य लक्ष्यमभवम्।

(निषादस्य, वानराणां, निशाम्य)

.............................................................................................................

.............................................................................................................

.............................................................................................................

2. भवन्तः गच्छन्तु नाहम् अधुना आगच्छामि। अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः। एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत्

(उपेक्ष्य, तत्परः, इदानीम्)

.............................................................................................................

.............................................................................................................

.............................................................................................................

3. तदा शीतलः अनिलः विचलाल। मेघःअमृतम् अवर्षत। नचिरेणैव वृक्षः पल्लवितः पत्रैः शाखाभिः च सम्पुष्टः यथापूर्वं परिणतिं प्राप्तवान्।

(आघोषः, पादपः, परिणामः, पर्णैः, वातः )

.............................................................................................................

.............................................................................................................

.............................................................................................................

**VI. कथास्तम्भं क्रमीकुरुत।**

**क).** * वृक्षः सम्पुष्टः अभवत्।

* एका शारिका वृक्षं त्यक्त्वा गन्तुम् अशक्ता।

* व्याधस्य शरेण वृक्षः विद्धः विषबाधितः च।

* शुष्कं वृक्षं त्यक्त्वा सर्वे गतवन्तः ।
* शारिकायाः आर्द्रतायां सन्तुष्टा तापसी वृक्षं शारिकां च अनुगृह्णाति ।

........................................................................................................................................
........................................................................................................................................
........................................................................................................................................
........................................................................................................................................
........................................................................................................................................

**ख)** * तापसी वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभवत् ।
* विषलिप्तः वृक्षः क्रमेण शुष्कः अभवत् ।
* शारिका पुरतः तापसीम् अपश्यत् ।
* वृक्षम् अनादृत्य गन्तुं सा न समर्था ।
* वृक्षः पल्लवितः पत्रैः शाखाभिः च संपुष्टः अभवत् ।
* विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः ।

........................................................................................................................................
........................................................................................................................................
........................................................................................................................................
........................................................................................................................................
........................................................................................................................................

**VII. प्रदत्तं गद्यभागं पठित्वा अधोनिर्दिष्टानां प्रश्नानां उत्तराणि लिखत ।**

**क).** मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः। तौ भोजनमन्विष्य गतौ । तयोः आगमनकालं यावत् वृक्ष एव पितरौ। स अस्मान् पोतकानिव संरक्षति स्म । मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता। वृक्षस्य अधः तण्डुलान् प्रसृतान् यदृच्छया अपश्यम् । तण्डुलान् आहर्तुम् उद्युक्तायां 'हा हतोऽस्मि'! इति रुदितमश्रौषम्। वृक्षस्य एका शुष्कशाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि अपतत् इव ।

1. गद्यांशे विद्यमानानां क्त्वान्त – ल्यबन्त – तुमुन्नन्तपदानि चित्वा लिखत ।

........................................................................................................

2. कौ भोजनमन्विष्य गतौ ?

........................................................................................................

3. वृक्षस्य अधः किम् अपश्यत् ?

.....................................................................................................

4. 'हा हतोऽस्मि'! इति रुदितमश्रौषम् । कः कस्मात् रोदिति ?

.....................................................................................................

5. उदाहरणानुसारं पदं विश्लेषयत ।

**उदाः-** हरिरत्र = हरिः + अत्र

बहिरागता = .............. + ..................

**ख).** सा वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् । तदा शीतलानिलः विचचाल । मेघः अमृतम् अवर्षयत् । नचिरेणैव वृक्षः पल्लवितः पत्रैः शाखाभिः च सम्पुष्टः यथापूर्वं परिणतिं प्राप्तवान् ।तत्र एकस्यां शाखायां वृक्षः तां दोलायितुं प्रचक्रमे । 'विलसतु हरिताभा लोकभूत्यै नितान्तम्' ।

1. सा कीदृशेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् ?

.....................................................................................................

2. वृक्षः तां किं कर्तुं प्रचक्रमे ?

.....................................................................................................

3. रेखाङ्कितपदस्य विश्लेषणं कुरुत ।

.....................................................................................................

4. तदा कः विचचाल ?

.....................................................................................................

**ग).** व्यासप्रणीतः इतिहासग्रन्थः भवति महाभारतम् । महत्तरोऽयं ग्रन्थः पञ्चमवेदत्वेन परिगण्यते । महत्वात् भारवत्वाच्च महाभारतमुच्यते ।कुरूणां पाण्डवानां च चरितं मुख्यतया तत्र प्रतिपाद्यः । अपि च बहूनि उपाख्यानानि तत्र तत्र निबद्धानि । "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्" इति व्यासस्य वचनं प्रसिद्धम् ।

1. व्यासप्रणीतः इतिहासग्रन्थः कः ?

.....................................................................................................

2. पञ्चमवेदत्वेन किं परिगण्यते ?

.....................................................................................................

3. महाभारते कति पर्वाणि सन्ति ?

.................................................................................................

4. महाभारतस्य मुख्यप्रतिपाद्यविषयः कः ?

.................................................................................................

5. व्यासस्य प्रसिद्धं वचनं किम् ?

.................................................................................................

**VIII. भाषान्तरीकरणं कुरुत**

पितरौ भोजनमन्विष्य गतौ । तयोः आगमनकालं यावत् वृक्ष एव पितरौ । स अस्मान् पोतकानिव संरक्षति स्म । मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता । वृक्षस्य अधः तण्डुलान् प्रसृतान् यदृच्छया अपश्यत् ।

.................................................................................................
.................................................................................................
.................................................................................................
.................................................................................................
.................................................................................................

**IX. अधः प्रदत्तानि वाक्यानि प्रादेशिकभाषया आङ्गलभाषया वा परिवर्तयत ।**

1. वृक्षःसर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् ।
2. वृक्षस्य आर्द्रता सर्वदा मातुः स्पर्शमिव आश्वासदायिन्यभवत् ।
3. सा वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् ।
4. शुककथायाः उपाख्यानमेव व्रज हरितम् ।
5. वृक्षः सर्वदा अस्मान् पोतकानिव संरक्षति स्म ।

1. .................................................................................................
2. .................................................................................................
3. .................................................................................................
4. .................................................................................................
5. .................................................................................................

**X. संस्कृतभाषायाम् अनुवदत ।**

1. വ്യാസൻ രചിച്ച ഇതിഹാസഗ്രന്ഥമാണ് മഹാഭാരതം .
2. മഹാഭാരതം പഞ്ചമവേദം എന്നറിയപ്പെടുന്നു .
3. കൗരവരുടെയും പാണ്ഡവരുടെയും ചരിതമാണ് ഇതിലെ പ്രതിപാദ്യവിഷയം .

1. ........................................................................................................
2. ........................................................................................................
3. ........................................................................................................

**XI. आङ्गलेयपदानां स्थाने पेटिकातः संस्कृतपदान्युपयुज्य खण्डिकां पुनर्लिखत ।**

(दिशा, मन्दं मन्दं, नाहं गच्छामि, तूष्णीं भूत्वा, कुत्रापि)

I am not going नाहं गच्छामि, भवन्तं विहाय नाहं any where गच्छामि । शारिका silent तत्रैव उपाविशत् । तस्याः तप्तं मन इव directions अरुणिम्ना लिप्ताः । अरुणिमनि एकं दृश्यं slowly स्मृतिपथमागतम् ।

........................................................................................................
........................................................................................................
........................................................................................................
........................................................................................................
........................................................................................................

**XII. पितरौ कृतज्ञतापूर्वकं वृक्षराजम् अनमताम् । एतत् सन्दर्भं मनसि निधाय सम्भाषणं पूरयतु ।**

माता - पुत्रि! शारिके ।
शारिका - ......................।
माता - कुतः त्वं भीता इव दृश्यते ?
शारिका - ...........................।
माता - लुब्धकः इति ! कः सर्वान् अरक्षत् ?
शारिका - ...........................।
माता - वृक्षराजं सधन्यवादं प्रणमामः ।

**एककम् – १ - आर्द्रता**
**पाठः – ३ - भविष्ये तव...**

## पाठः - 3

**I. कोष्ठकात् समुचितानि उत्तराणि स्वीकृत्य उत्तरयत।**

1. पुत्रः स्नुषा च ...........सोपानमार्गेण बहिरागच्छति। ........................................
(मन्दिरात्, कार्यालयात्, यानात् )।

2. संस्कृतचलच्चित्रेतिहासे प्रथमचलच्चित्रः कः ? ........................................
(आदिशङ्कराचार्यः, भगवद्गीता, प्रीयमानसम् )

3. सालारम् इति कस्य नाम भवति ? ........................................
(यानस्य , वृद्धसदनस्य, कार्यालयस्य )

4. तात ! प्रकोष्ठे तस्मिन् ......... वर्तते। ........................................
(उष्णं , शैत्यं, धूमं )

5. भविष्ये तव ----कस्याः वचनमिदम् ? ........................................
(रोस्याः, वृद्धमातुः, पत्न्याः)

6. संस्कृतचलच्चित्रेतिहासे द्वितीयचलच्चित्रः कः ? ........................................
(इष्टि , भगवद्गीता, प्रियमानसम् )

7. आदिशङ्कराचार्यः नाम संस्कृतचलच्चित्रस्य निदेशः कः ? ........................................
( जि.बि.अय्यर्, प्रियदर्शन्, मधु अम्बाट् )

8. कार्यालयस्य देहल्यां स्थाणुमवलम्ब्य उपविशति अपरा ............ ...............................।
(रोसी , वृद्धमाता, स्नुषा )

9. सोपानस्य वामतः एका पुरातनी ..............। ........................................
(सरणी, द्रोणी , पीठिका )

10. दिनाभ्यन्तरे मृतिस्तासाम् - कस्याः इदं वचनम् ? ........................................
(रोस्याः, मातुः, पत्न्याः )

**II. उदाहरणानुसारं विश्लेषयत ।**

| | | |
|---|---|---|
| ततस्तस्य | - | ततः + तस्य । |
| मृतिस्तासाम् | - | …………................... + ........................... । |
| नेष्यमाणस्त्वम् | - | …………................... + .......................... । |

**III. अधः प्रदत्तं गद्यभागं पठित्वा पटकथां लिखत ।**

"भवन्तः गच्छन्तु, नाहमधुना आगच्छामि"। "अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः" ? एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत्। "तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था"। "गच्छन्तु, सर्वे गच्छन्तु" ।

सगद्गदं पुनः पुनः विलपन्ती,अन्येषां गमनं सास्रं पश्यन्ती तमेव गाढमाश्लिष्य "नाहं गच्छामि", "नाहं गच्छामि", "भवन्तं विहाय नाहं कुत्रापि गच्छामि"। शारिका तृष्णीं भूत्वा तत्रैव उपाविशत्। तस्याः तप्तं मन इव दिशः अरुणिम्ना लिप्ताः। अरुणिमनि एकं दृश्यं मन्दं मन्दं स्मृतिपथमागतम् ।

| *रंगविवरणम्* | *सम्भाषणम्* | *विनिमयः* |
|---|---|---|
| .<br>.<br>.<br>.<br>.<br>.<br>.<br>.<br>.<br>.<br>.<br>.<br>.<br>.<br>. | | |

**IV. गद्यभागं पठित्वा क्त्वान्त- ल्यबन्त -तुमुन्नन्तापदानि चित्वा लिखत।**

पुत्रः परिवृत्य अवलोकयति। रोसी आगच्छति। रोसी वदति। लक्ष्म्यै व्यजनम् अनपेक्षितमेव। ईदृशमुष्णं सेढुं सा समर्था एव। एतस्मादपि असह्यमुष्णं सोढ्वा एव सा भवन्तमपोषयत्।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| ........................... | ........................... | ........................... |

**V. पेटिकातः उचितपदानि स्वीकृत्य रिक्तस्थानानि पूरयत।**

| मार्जयति, उपविशति, अपसार्य, दर्पणे |
|---|

पुत्रः कार् याने ............................... । चिन्ताकुले नेत्रे ............................... दृश्यते। खिन्नः पुत्रः उपनेत्रम् अपसार्य करवस्त्रेण मुखं ............................... ।

